# Bharatam Jayatachchiram

# ભારતં જયતાચ્ચિરમ્

## Document Information

Text title : Bharatam Jayatachchiram

File name : bhArataMjayatAchchiram.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : vijayan vi. paTTAmbI

Acknowledge-Permission: Vijayan V. Pattambi

Latest update : August 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 12, 2024

*sanskritdocuments.org*

# Bharatam Jayatachchiram

# ભારતં જયતાચ્ચિરમ્

સર્વદેશેષુ સમ્બુદ્ધં
સર્વલોકેષુ વિશ્રુતમ્ ।
સર્વલોકસમારાધ્યં
ભારતં જયતાચ્ચિરમ્ ॥ ૧॥

સ્વરુચિં સાધુ સંવર્ધ્ય
સાધુભાવં પ્રકાશ્ય ચ ।
સ્વાન્તં શાન્તિસંયુક્તં
ભારતં જયતાચ્ચિરમ્ ॥ ૨॥

સ્વાયત્તં વર્ધિતં વીર્યં
સ્વાયત્તં જનમણ્ડલમ્ ।
સ્વરભેદં વિના ચૈત-
દ્ભારતં જયતાચ્ચિરમ્ ॥ ૩॥

યોગવિદ્યાં પ્રસાર્યાત્ર
સર્વલોકેષુ ચ પુનઃ ।
સર્વચિત્તાનિ સંયમ્ય
ભારતં જયતાચ્ચિરમ્ ॥ ૪॥

સ્વાયત્તીકૃત્ય તન્ત્રાણિ
સંલક્ષ્ય શત્રુવિક્રમાન્ ।
સંસેવ્ય રણતન્ત્રાણિ
ભારતં જયતાચ્ચિરમ્ ॥ ૫॥

સંલક્ષ્ય સાધુ વ્યાધિઘ્ના-
નૌષધાનપિ સત્વરમ્ ।
નિહત્ય વ્યાધિજાલં ત-
દ્ભારતં જયતાચ્ચિરમ્ ॥ ૬॥

સંસેવ્ય સંસ્કૃતં નિત્યં
સર્વલોકોપકારકમ્ ।
સર્વાન્ જ્ઞાનેન સત્કૃત્ય
ભારતં જયતાચ્ચિરમ્ ॥ ૭॥

સ્વાધીનસ્ય સુખઞ્ચાન્ય-
દન્યૈષા ચાત્મનિર્વૃતિઃ ।
સ્વાધીનં સર્વતોભદ્રં
ભારતં જયતાચ્ચિરમ્ ॥ ૮॥

— વિજયન્ વિ. પટ્ટામ્બિ

*Bharatam Jayatachchiram*

pdf was typeset on August 12, 2024

Please send corrections to *sanskrit@cheerful.com*